Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८१
जून - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### काव्यशास्त्रविनोदेन



काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् इति सुभाषितं वयं पदे पदे गायामः। परन्तु अहं पृच्छामि – किं वयं खलु एवम्प्रकारेण कालं यापयामः ? न हि। अस्माकं कालस्तु अर्थोपार्जनेन, स्पर्धया, इर्ष्यया, धावनेन वा याति।

कर्मनिष्ठः महात्मा विनोबा-भावे कस्मिंश्चित् आश्रमे कृषिं करोति स्म। तदानीम् एव कश्चित् युवकः तेन मेलितुं प्रविष्टः। भावेमहोदयं तथा श्रान्तं निरीक्ष्य युवकः पृष्टवान् – 'भवान् विनोदार्थं किं कार्यं करोति ?' भावेमहोदयेन उक्तम् – 'विनोदार्थम् अहम् एतदेव कार्यं करोमि।' अधीरः युवकः पुनः पृष्टवान् – 'एतत् तु कृषिकार्यं वर्तते। विनोदार्थं भवान् किं करोति ?' भावेमहोदयः उक्तवान् – 'मम विनोदः अत्रैव वर्तते।' युवकस्य आश्चर्यम् अभवत्। कारणं सः तु कदापि श्रमयुक्ते कार्ये विनोदस्य कल्पनां न कृतवान्।

कथनस्य तात्पर्यम् अस्ति यत् वयं सर्वेषु कार्येषु आनन्दस्य ग्रहणं कर्तुं शक्नुयाम चेत् विनोदः दूरे नास्ति। अत्र शिक्षकाः वदेयुः यत् वयं तु सदैव काव्येषु निमग्ना भवामः।

अत्र मम कश्चित् प्रश्नः अस्ति। कति शिक्षकाः पाठ्यपुस्तकेभ्यः एकं पदं बहिः स्थापयित्वा किमपि नूतनं साहित्यं पठन्ति ? पाठ्यपुस्तकानि तु शिक्षकाणां कण्ठे बलात् आरोपिताः कण्टकमालाः सन्ति। पाठ्यपुस्तकानि आजीविकायाः साधनात् परं किमपि न सन्ति।

शिक्षणक्षेत्रस्य अस्मदीया कल्पना अपि जटिला अस्ति। तेन कारणेन अपि बुद्धिः सङ्कुचिता भवति। अस्माकं शिक्षणव्यवस्था शिक्षकम् एकस्मिन् प्रकोष्ठे पूरयित्वा आदिशति यत् अत्र कृष्णफलकं सुधाखण्डः च वर्तते। भवान् तृतीयस्य वस्तुनः कल्पनां न करोतु। भवान् निवृत्तिं यावत् वस्तुद्वयं त्यक्ष्यति चेत् समाजे अशिक्षितः भविष्यति।

भगवता बुद्धेन सह अरण्ये विहरन्तः शिष्याः कदाचित् भगवन्तं पृष्टवन्तः – 'भगवन् ! भवतः देहः जीर्णः जायमानः दृश्यते। भवतः देहस्य अवसानात् पूर्वं वयम् अवशिष्टं ज्ञानं प्राप्तुम् इच्छामः। कृपया वदतु। अस्माभिः इतोऽपि किं ज्ञातव्यम् ?' भगवान् भूमौ किञ्चित् नत्वा, शुष्कैः पर्णैः अञ्जलिं पूरयित्वा उक्तवान् – 'भवन्तः केवलम् एतावत् ज्ञानं प्राप्तवन्तः। अधः विद्यमानानि असंख्यकानि पर्णानि पश्यन्तु। तावत् इतोऽपि ज्ञातव्यम् अस्ति।'

## वृद्धाः हि मार्गदर्शिणः

व्योम शाहः

पुरा समर्थदेशे वृद्धिमान् राजा राज्यं करोति स्म। तस्य राज्ञः शासने प्रजाः सुखेन जीवनं यापयन्ति स्म। वाणिज्याः प्रफुल्लिताः आसन्। मृगाः आनन्देन चरन्ति स्म। समस्ताः लोकाः सुखिनः आसन्। अथ कदाचित् राजा ज्वरपीडितः अभवत्। वैद्यानां बहुभिः उपचारैः अपि तस्य ज्वरः न अपगतः। सर्वाः प्रजाः नृपस्य सेवायां लग्नाः आसन्। दूरदेशात् निष्णाताः भिषजः अपि समागताः। तैः अपि बहुयत्नः कृतः किन्तु राज्ञः ज्वरः दिनानुदिनं वर्धमानः एव आसीत्। एकस्यां रात्रौ ईश्वरस्य स्मरणे लीनः सः ईश्वरस्य शरणं प्राप्नोत्। एतां वार्तां श्रुत्वा सम्पूर्णः देशः दुःखितः।

वृद्धिमतः नृपस्य एकः एव पुत्रः आसीत्। नृपस्य उत्तराधिकारी सः एव भविष्यति इति निश्चयः मन्त्रिमण्डलेन कृतः। किन्तु सः किशोरावस्थायाम् एव आसीत्। अतः गभीरं विचार्य मन्त्रिमण्डलः राज्ञीम् अवदत् "जयतु राज्ञि! जयतु। सर्वानुमतेन अस्माभिः निश्चयः कृतः यत् राजकुमारः एव अस्माकम् उत्तराधिकारी भविष्यति। किन्तु सः सम्प्रति किशोरावस्थायाम् अस्ति। अतः भवती तस्य चित्ते सुसंस्कारान् सिञ्चतु। तावत् राज्यभारं वयं परस्परेण वहिष्यामः। महत्त्वपूर्णान् निर्णयान् भवत्यै निवेदयिष्यामः" इति। राज्ञी सस्मितं स्वीकृतिं दर्शितवती।

कालक्रमेण असौ बालकः कलासु नीतिषु शास्त्रेषु च कुशलः सञ्जातः। युवावस्थाम् अवाप्तस्य तस्य राज्याभिषेकः कृतः। नूतनः राजा पिता इव राज्यम् अपालयत्। राज्यं समृद्धम् अभवत्। सर्वे जनाः सुखिनः तुष्टाः च आसन्।

अथ कदाचित् राज्ये अनावृष्टिः सञ्जाता। वर्षत्रयं दुष्कालः अभवत्। पिपासया बुभुक्षया च बहवः जनाः मृताः। एतत् दृष्ट्वा राजा चिन्तानुकूलः अभवत्। स अचिन्तयत् – "न जानामि यत् एषः दुष्कालः कदा समाप्तः भविष्यति। किन्तु एवंविधम् अहं मम प्रजाः द्रष्टुं न शक्नोमि। युवानः म्रियन्ते। यदि ते एव न भविष्यन्ति तर्हि भविष्यस्य का कथा? सर्वमिदम् ऐश्वर्यं व्यर्थम् एव भविष्यति। अस्य विषये मया किमपि कर्तव्यम्। युवानः पोषिताः भवेयुः चेत् एव इदं राष्ट्रं दीर्घं जीविष्यति। अतः ये व्यर्थम् अन्नं खादन्ति तेषां परिहारः कर्तव्यः। राज्ये बहवः वृद्धाः सन्ति। न ते राज्यस्य समृद्धौ लाभं कारयन्ति न च ते किमपि कार्यं कुर्वन्ति। ते सर्वेऽपि हन्तव्याः" इति। भ्रष्टया बुद्ध्या नृपःआदेशम् अकरोत् यत् – "भवद्भिः सर्वैः स्वस्य भविष्याय कोशलतायै च भवतां भूतकालः विस्मरणीयः। मम सैनिकाः भवतां गृहम् आगमिष्यन्ति। भवतां गृहे येऽपि वृद्धाः सन्ति ते सर्वेऽपि हन्तव्याः। अथवा मम सैनिकाः बलेन तान् प्रगृह्य हनिष्यन्ति।" राज्ञः एतादृशम् आदेशं श्रुत्वा सर्वेऽपि भयभीताः। मन्त्रिणः राजानं बहुधा अबोधयन् किन्तु राजा निर्णये: तटस्थः आसीत्। क्रमशः सैनिकैः ग्रामे ग्रामे सर्वेऽपि वृद्धाः हताः।

कस्मिंश्चिद् ग्रामे एकः कृषकः आसीत्। सः कर्तव्यनिष्ठः आसीत्। तस्मै राज्ञः निर्णयः नारोचत किन्तु सः विरोधं कर्तुं समर्थः न आसीत्। तस्य पिता वृद्धः आसीत्। तेन निर्णयः कृतः यत् सः कथञ्चिदपि तस्य पितुः रक्षणं करिष्यति। सः पितरं राज्ञः निर्णयं श्रावयन् अवदत् –"भवतः ऋते मम कोऽपि नास्ति। अतः अहं भवन्तम् अस्माकं भूमिगृहे गोपयिष्यामि। यदा सैनिकाः आगमिष्यन्ति तदा तेभ्यः कथयिष्यामि यत् अहं भवतः वधं कृतवान्।" वृद्धः पिताऽपि तस्य स्वीकारम् अकरोत्। द्वितीये दिने तथैव अभवत्। इदानीं तस्मिन् देशे एकोऽपि वृद्धः न आसीत्।

कालचक्रे पर्जन्यकालः प्राप्तः। वर्षेऽस्मिन् मेघाः दृष्टाः वृष्टिरपि जाता। सर्वेऽपि आनन्दिताः। किन्तु तदा

एका समस्या उद्भूता। दुष्कालवशात् सर्वाणि अपि बीजानि समाप्तानि आसन्। अन्नं रोपयितुं बीजानि एव न आसन्। सर्वे चिन्तार्ताः अभवन् यत् किं कर्तव्यम्। बहिर्देशात् आनयने विलम्बः भवेत्। अतः अयं महाप्रश्नः महत्तमः अभवत्। अथ कृषकः अपि चिन्ताम् अकरोत्। चिन्तितं पुत्रं दृष्ट्वा तस्य पिता चिन्तायाः कारणम् अपृच्छत्। कृषकः स्वीयां व्यथां व्यक्तीकृतवान्। पिता उक्तवान् –''चिन्ता मास्तु। सस्यं रोपयितुं बीजानाम् आवश्यकता नास्ति। अस्य उपायः अस्ति, किन्तु प्रतिप्रश्नः न कर्तव्यः।'' पुत्रः कृषकः पितुः वचनम् अङ्गीकृतवान्। पिता अवदत् – ''यः मार्गः ग्रामात् बहिः गच्छति तम् उभयतः हलेन कर्षतु। वर्षायाः अनन्तरं तत्र सस्यं विकसिष्यति।'' ''किन्तु बीजेन विना अङ्कुरः कथं भविष्यति पितः !'' इति पुत्रः अपृच्छत्। ''यथोक्तं करोतु।'' इति पिता अकथयत्। कृषकः पितुः आज्ञाम् अपालयत्। मार्गम् उभयतः सः हलेन अकर्षत्। ग्राम्याः तं ''मूर्ख !'' ''मूढ !'' इति सम्बोधनम् अकुर्वन्। ईश्वरस्य कृपया वृष्टिः अभवत्। तत्र सस्यानि अपि वर्धितानि। कृषकः अतीव सन्तुष्टः अभवत्।

तदैव एषा वार्ता राजसभां प्राप्ता। सर्वेऽपि एतां विचित्रां वार्तां श्रुत्वा आश्चर्यचकिताः अभवन्। नृपः तं कृषकं आह्वयत्। राजा तं पृष्टवान् ''बीजैः विना त्वं सस्यानि कथम् अवर्धयत् !'' भीतेन स्वरेण सः उक्तवान् – ''भवते कथयिष्यामि किन्तु भवान् मह्यम् अभयं ददातु यत् भवान् मां न मारयिष्यति।'' ''न हनिष्यामि।'' इति अभयं नृपः अददात्।

''राजन् ! वस्तुतः भवतः आज्ञायाः विरुद्धम् अहं मम तातं रक्षितवान्। सः माम् एतत् उपायं दर्शितवान्।'' इति अवदत् कृषकः।

''कुत्र अस्ति तव पिता ? तं राजसभां निमन्त्रयतु। अहं ज्ञातुम् इच्छामि यत् एतत् कथम् अभवत्।'' इति नृपः अवदत्।

''अहं बिभेमि यत् भवान् तं हनिष्यति।'' इति कृषकः अवदत्।

''न तथा करिष्यामि इति मम वचनम्।'' इति राजा अवदत्। अपरस्मिन् दिने सः तातेन सह राजसभाम् आगतवान्। नृपः वृद्धस्य पादयोः वन्दनम् अकरोत् अपृच्छत् च– ''बीजैः विना सस्यवर्धनं कथम् अभवत् इत्येतत् रहस्यं ज्ञातुं भवन्तम् अहम् आह्वयम्।''

''राजन् ! अत्र रहस्यं किमपि न वर्तते। वस्तुतः यदा वयं गोणीषु गोधूमादिकं धान्यं परिपूर्य एकस्मात् ग्रामाद् अपरं ग्रामं प्रति नयामः तदा तानि धान्यानि कदाचित् मार्गम् उभयतः गोण्याः अपतन्। तानि बीजरूपेण भूमौ एव आसन्। कर्षणेन तत्रत्या भूमिः शिथिलीभवति। तेन च वृष्टौ सस्यानि अवर्धन्त।'' इति वृद्धः अकयथत्।

नृपः एतत् श्रुत्वा स्तब्धः अभवत्। सः चिन्तितवान् यत् सः महतीं क्षतिं कृतवान् कारणं वृद्धानाम् अनुभवः भवति। वृद्धानाम् अनुभवः अपि देशस्य प्रगत्यै महत्त्वपूर्णः इति सः अवगतवान्। अनन्तरं सः तस्मै वृद्धाय पारितोषिकं दत्तवान् तस्य च सेवां कृतवान्।

कथायाः बोधः तु अयमेव यत् जीवनस्य सर्वांशस्य विजेतारः अस्मदीयाः मातापितरः सर्वेऽपि वृद्धपरिजनाः अस्माकम् एव समीपस्थाः सन्ति। तैः सह उपवेष्टव्यम्। तेषां जीवने किं किम् अभवत् इति प्रश्नाः प्रष्टव्याः। बाल्यात् प्रभृति ये अस्माकं जीवने रूचिं धृतवन्तः तेषां जीवनस्य उत्तरकाले वयं तेषां जीवने रुचिम् स्वीकुर्मः चेत् वरम्। सङ्कल्पं कुर्मः यत् न्यूनातिन्यूनं दशनिमेषं यावत् वयं तैः सह उपविशामः। दूरवाणीं दूरदर्शनं सर्वाणि च साधनानि परित्यज्य।

## विश्वशान्तेरुपायः

डॉ. सुखेश्वरः झा

(अनुवर्तते ... )

महाभारतकारस्य इयम् आर्य-दृष्टिः यत् पृथिव्यां यावन्ति धन-धान्यानि कामिनी-काञ्चनादीनि वस्तूनि, सर्वाण्यपि तानि कस्यचित् एकस्यापि जनस्य सन्तोषाय अलं न भवन्ति। हविषा कृष्णवर्त्मा (-अग्निः) इव भोग्येन भोगाभिलाषः वर्तततराम् इति तु अन्यत्। किन्तु जीवन-निर्वाहाय किमपि भोज्यपेयोपयोज्यं यदस्ति न्यूनतोऽपि अनिवार्यं तस्य लाभः प्रत्येकजनस्य कृते अपरिहार्यः। लाभे शान्तिः, अलाभे दुर्वारा अशान्तिः। लाभश्च वस्तुनः परिमाण-प्राचुर्यम् अपेक्ष्यते। तच्च उत्पादनवृद्ध्या एव स्यात्।

घातक-शस्त्रास्त्रमूलायाः अशान्तेः परिहारस्तु मानवीयताभावनायाः भ्रातृत्वभावनायाश्च प्रसाराद् एव सम्भवति। विकासक्रमात् मानवानां भूयसी सङ्ख्या एकवंशोत्पन्नानाम् आधुनिकवंश्यानां ग्रामव्यापिनी इव विश्वव्यापिनी सञ्जाता। कालिकी दैशिकी च दूरते एव मध्ये व्यवधानम् आवरणं वा सृजतः। खाद्यपेय-वस्त्रावास-सम्प्रदाय-भेदाश्च स्थान-समय-सृष्टाः। मूलतो मानवो मानवाद् अभिन्न एव। अद्यापि सौविध्यानुरोधात् कस्यचिद् भ्राता, पुत्रः, पौत्रो वा दूरदेशम् आवसति। तान् अपि वंश्यान् कालः तथैव भिन्नान् कर्ता यथा अन्यान् विश्वस्थान् चकार। अतः विज्ञानस्य मानवकल्याणाय एव उपयोगः भवतु न सृजतु भ्राता भ्रातृ-विघाताय आयुधम् इत्येषा भावना प्रचार्यमाणा अवधीयमाना च विश्वशान्तये प्रभवति।

परस्पर कलहेर्ष्या-द्वेष-लोभ-मोहादि दुर्भावनमूला या अशान्तिः तां शमयितुम् उक्तभ्रातृत्वभावनया सहैव मनुष्याणाम् अध्यात्म-विद्या-योगेन विवेकोदयः एव समर्थः उपायः भवेत् किल। ईर्ष्यादिदुर्गुणस्थाने कृपा-करुणा परोपकारादि सद्भावनानाम् उदयः असारस्य संसारस्य सम्यग्-ज्ञानादेव सम्भवति। तज्ज्ञानञ्च अध्यात्मविद्यया भविता। अध्यात्मविद्ययैव सकलानर्थकारिणी भौतिक-भोगमूला जनानां प्रवृत्तिः क्षीणा स्यात्। तथैव-

**ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन बुञ्जीथा मा गृधः कस्यस्विद्धनम्॥** (ईशावास्योपनिषत्-१)

इति सकलानर्थप्रशमकारिणी त्यागमूला प्रवृत्तिः उदयेत्। तस्मात् संसारे शान्तेः उपायतया अध्यात्मविद्यायाः उपयोगः नूनं फलवान् भवितुं शक्नोति इति मे विश्वासः।

संक्षेपतः संसारे अशान्तिः जनसङ्ख्यावृद्धिमूला, घातका-युधमूला, मानव-दुर्भावनमूला च वर्तते। जन्म-क्रम-नियन्त्रणात् जीवननिर्वाहाय अनिवार्यवस्तूनां प्रचुरमात्रायाम् उत्पादनात्, विश्वमानवेषु एक-परिवारीयता-भावनायाः प्रचारात् भौतिकभोगभावनां निराकृत्य अध्यात्मविद्याबलेन त्याग मूलायाः भावनायाः यथा स्यात् तथा उपदेशात् सा अशान्तिः दूरीकर्तुं शक्या। 'वसुधैव कुटुम्बकम्' इति भावनया सह

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥**

इति सर्व-कल्याण-भावना एव विश्वशान्त्यै प्रभवेत् इति दृढं प्रतीमः।

# मासवार्ता

## सम्पन्नं संस्कृतग्रीष्मशिबिरम्



एप्रिलमासस्य १९ दिनाङ्कतः मईमासस्य २५ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-एकेडेमीसंस्थाने संस्कृतग्रीष्मशिबिरस्य आयोजनम् अभवत्। शिबिरेऽस्मिन् विविधाः वर्गाः तद्यथा Skg तः ८ कक्ष्यायाः छात्राणां कृते बालसंस्कृतवर्गाः, नवमकक्ष्यायाः दशमकक्ष्यायाः च छात्राणां कृते संस्कृतव्याकरणवर्गाः, श्रीमद्भगवद्गीतायाः श्लोकोच्चारणवर्गाः, पाणिनीयसूत्रपाठवर्गाः, सन्धिवर्गाः, संस्कृतभाषाशिक्षणवर्गाः, वार्ता रे वार्तावर्गाः च इत्येते वर्गाः आयोजिताः । विविधेषु अभ्यासक्रमेषु आहत्य २६१ छात्राः संस्कृतस्य अध्ययनम् अकुर्वन् । डॉ. अमी जोशी, श्रीश्यामः पटेलः, श्रीमती सङ्गीता मिस्त्री, डॉ. मिहिरः उपाध्यायः च शिक्षकत्वेन छात्रेभ्यः मार्गदर्शनं प्रायच्छन् । संस्कृतस्य अध्ययनं कृत्वा छात्राः सन्तुष्टाः आसन्। अत्र उल्लेखनीयं यत् इदं ग्रीष्मशिबिरं सम्पूर्णतया online प्राचलत्। शिबिरेऽस्मिन् न केवलम् अहमदाबादनगरस्थाः छात्राः अपि तु देशविदेशेभ्यः छात्राः संस्कृतशिबिरे भागम् अवहन्। कार्यक्रमोऽयं सफलः।

## कृपया हसन्तु

वैद्य: - (रुग्णम् उद्दिश्य) किं जातम् ?

रुग्ण: - यदि शुल्कं न्यूनं स्वीकरोति तर्हि वदामि । अन्यथा स्वयमेव अन्वेषणं करोतु क: रोग: ? इति ।

वैद्य: - भवतु, एतत् औषधं स्वीकरोतु ।

रुग्ण: - एतत् औषधं कस्मै रोगाय दत्तम् ?

वैद्य: - द्विगुणीतं शुल्कं ददाति तर्हि वदामि । अन्यथा स्वयमेव अवगच्छतु यत् एतत् औषधं कस्मै रोगाय !



★ ★ ★ ★ ★

भो: मम उदर ! किं मया भवते भिन्नं कथनीयं यत् एतेषु दिनेषु भवतापि बहि: न आगन्तव्यम्... !!

★ ★ ★ ★ ★

रमण: - अस्माकं देशे मुख्यभूता: कति ऋतव: सन्ति ?

मोहन: - त्रय: । शीत-ऋतु:, उष्ण-ऋतु:, वर्षा-ऋतु: च ।

रमण: - एतेषु ऋतुषु सर्वाधिकम् अध्ययनं क: अकरोत् ?

मोहन: - एष: कीदृश: प्रश्न: ? ऋतु: कथं पठितुं शक्नोति ?

रमण: - शक्नोति । सर्वेषु ऋतुषु ग्रीष्म-ऋतु: सर्वाधिकम् अध्ययनम् अकरोत् ।

मोहन: - तत् कथम् ?

रमण: - सर्वाधिकां "डिग्री" तस्य समीपे एव वर्तते ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**आदिमध्यनिधनेषु सौहृदं सज्जने भवति नेतरे जने ।**
**छेदतापनविघर्षताडनैः नान्यभावमुपयाति काञ्चनम् ॥**

**तात्पर्यम्** – सज्जनेषु आरम्भे, मध्ये, अन्ते च उत्तमता एव भवति । अर्थात् सज्जनाः कदापि स्वगुणं न त्यजन्ति । सज्जनानां एतादृशः गुणः अन्येषु न भवति । छेदनेन, तापनेन, घर्षणेन, ताडनेन अपि सुवर्णस्य सत्त्वं कदापि न परिवर्तते ।

**आदौ चित्ते ततः काये सतां सम्पद्यते जरा ।**
**असतां तु पुनः काये नैव चित्ते कदाचन ॥**

**तात्पर्यम्** – सज्जनानां तु प्रथमं मनसि अनन्तरं शरीरे वार्धक्यं परिदृश्यते । किन्तु दुर्जनानां तु शरीरे वार्धक्यं दृश्यते चेदपि चित्ते वार्धक्यं न भविष्यति एव ।

**आदौ सङ्घटयेद् राष्ट्रं ततः कांक्षेत् सम्मुन्नतिम् ।**
**सङ्घशक्तिं विना राष्ट्रं कुतो वा कुत उन्नतिः ॥**

**तात्पर्यम्** – प्रथमं राष्ट्रस्य सङ्घटनं कर्तव्यम् । ततः उन्नतिः साधनीया । कारणं सङ्घटितशक्तिं विना राष्ट्रं कुतः ? अभ्युदयो वा कुतः ?

## ज्ञानसरिता

श्यामः पटेलः

**दीपगृहम्** – दीपगृहं समुद्रे विचरतां धीवराणां मार्गदर्शनं करोति । दीपगृहस्य सङ्केतदीपस्य प्रकाशः दूरात् द्रष्टुं शक्यते: । विभिन्नैः काचैः प्रकाशं दूरपर्यन्तं प्रसारयितुं शक्यते । दीपगृहस्य निर्माणं समुद्रतटे नौकाश्रयस्य समीपं वा समुद्रे कस्मिंश्चित् द्विपे भवति । एतस्य निर्माणं सुदृढं भवति यस्मात् समुद्रस्य भयङ्करान् जलतरङ्गान् सोढुं शक्नोति । धीवराः प्रारम्भे ''लाइट लिस्ट्स'' नामना पुस्तकस्य साहाय्येन दीपगृहस्य दीपसङ्केतान् अवगच्छन्ति । विश्वस्य प्रथमस्य दीपगृहस्य निर्माणं ख्रीस्ताब्दात् पूर्वं २००तमे वर्षे एलेकझान्ड्रियायाः ''फारोस'' नाम्ना द्वीपे इजिप्तदेशस्य ''टोलोमी'' नामकः नृपः कारितवान् । तस्य औन्नत्यं १५० मीटरपरिमितम् आसीत् । विश्वस्य प्राचीनतमम् उपलब्धमानं दीपगृहम् इङ्ग्लेण्डदेशस्य ''डोवर'' नाम्नः प्रदेशे अस्ति । एतस्य निर्माणं ''केलिगुला'' नामकेन भूपतिना ख्रीस्ताब्दात् पूर्वं ९०तमे वर्षे कारितम् ।

पुरा दीपगृहस्य रचना काष्ठस्य भवति स्म । काष्ठस्य स्तम्भस्य उपरि द्रोण्यां काष्ठानि अङ्गाराः च प्रज्वाल्यन्ते स्म, येन समुद्रस्थिताः धीवराः दूरात् द्रष्टुं शक्नुयुः । कालक्रमेण दीपगृहस्य रचनायां परिवर्तनानि जातानि । इष्टिकाभिः निर्मितं प्रथमं दीपगृहं ख्रीस्ताब्दस्य १५४६ तमे वर्षे सञ्जातम् । तत् २४६ फीटपरिमितम् उन्नतम् अस्ति । विश्वस्य उत्तुङ्गतमं दीपगृहं जापानदेशस्य योकोहामाप्रदेशे स्थितं वर्तते । तस्य औन्नत्यं १०६ मीटरपरिमितम् अस्ति । विश्वे प्रथमवारं पाषाणैः दीपगृहस्य निर्माणं "Grandfather of Civil Engineering'' इत्युक्ते ज्हॉन स्मिटनमहोदयः १७५६ तमे वर्षे कृतवान् । इङ्ग्लेण्डदेशस्य लीमाउथप्रदेशे स्थितं दीपगृहं ''स्मिटन एडिस्टोन'' नाम्ना प्रसिद्धम् । तस्योपरि २४ सिक्थवर्तिकाः प्रज्वालयन्ते स्म । सम्प्रति दीपगृहस्य संरचना वज्रचूणेन लोहशलाकाभिः च भवति । दीपगृहेषु सङ्केतध्वनियन्त्रम् अपि भवति । तथा ततः जलयानानां मार्गदर्शनाय ''रेडियो डायरेक्शन फाइन्डर'' नाम्ना यन्त्रेण सङ्केताः अपि प्रसारिताः भवन्ति ।

**दीपगृहम्** – light house, **काचः** – lens, **तरङ्गः** – wave, **औन्नत्यम्** – height, **इष्टिका** – brick, **सिक्थवर्तिका** – candle, **वज्रचूर्णम्** – cement, **लोहशलाका** – iron rod

## शब्दमञ्जूषा

| | |
|---|---|
| **बहुमतम्** | majority |
| **प्रबन्धकः** | manager |
| **सदस्यः** | member |
| **छात्रभोजनालयः** | mess |
| **धनादेशः** | money order |
| **यन्त्रयानम्** | motor |
| **यन्त्रयानद्विचक्रिका** | motor cycle |
| **यन्त्रयानपरिचालकः** | motor driver |
| **आन्दोलनम्** | movement |
| **नगरपालिका** | municipality |
| **सङ्ग्रहालयः** | museum |
| **नखः, नखम्** | nail |
| **राष्ट्रम्** | nation |
| **राष्ट्रियः** | national |
| **राष्ट्रवादी** | nationalist |

## किं भवन्तः जानन्ति ?

**१ ) सिखगुरोः अर्जुनदेवस्य जन्म कदा अभवत् ?**
(क) संवत् – १५२० (ख) संवत् १६२०
(ग) संवत् १५२१ (घ) संवत् १६२१

**२ ) प्रसिद्धस्य गणितशास्त्रिणः आर्यभटस्य जन्म कदा अभवत् ?**
(क) ४७२ ई. (ख) ४७६ ई. (ग) ४६० ई. (घ) ४५२ ई.

**३ ) महाराणाप्रतापस्य अकबरस्य च मध्ये प्रसिद्धं हलदीघाटीयुद्धं कदा अभवत् ?**
(क) वर्ष १५२६ (ख) वर्ष १५४६ (ग) वर्ष १५७६ (घ) वर्ष १५५६

**४ ) आदिशङ्कराचार्यस्य जन्म कदा जातः आसीत् ?**
(क) ७७६ ई. (ख) ७८८ ई. (ग) ७८२ ई. (घ) ७९२ ई.

**५ ) महर्षेः अरविन्दस्य जन्म कदा अभवत् ?**
(क) १५ जुलाई १८६५ (ख) १५ अगस्त १८७२
(ग) १४ अगस्त १८७५ (घ) १९ अगस्त १८७६

**६ ) शरदपूर्णिमा कस्मिन् मासे भवति ?**
(क) आश्विन (ख) कार्तिक (ग) मार्गशीर्ष (घ) फाल्गुन

**७ ) गुरुपूर्णिमा कस्मिन् मासे आगच्छति ?**
(क) श्रावण (ख) आषाढ (ग) फाल्गुन (घ) माघ

उत्तराणि – (१) ख (२) ख (३) ग (४) ख (५) ख (६) क (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**Date :** 14/6/21 to 5/7/21
**Day :** Mon-Wed-Fri
**Time :** 7:00 am to 8:30 am (IST)
**Fees :** 2000/-

## बालसंस्कृतवर्गः

**Batch 1 for students of class 1 to 4**
**Batch 2 for students of class 5 to 8**

**Date :** 14/6/21 to 5/7/21
**Day :** Mon-Wed-Fri
**Time :** 7:00 am to 8:30 am (IST)
**Fees :** 2000/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

(Sampratam means "Current")

धन्यवादः...

संस्कृतसाम्प्रतं पत्रिका पञ्चदशवर्षेभ्यः प्रतिमासं संस्कृताभिमानिनां सेवायां प्रकाश्यते । संस्कृताभिमानिनां भवतां सहयोगेन सरस्वतीमातुः कृपया च पत्रिकायाः यात्रा षोडशे वर्षे आरभ्यते । एतस्मिन् प्रसङ्गे वयं ग्राहकानां सहयोगिनां च ऋणं स्वीकुर्मः धन्यवादाश्च व्याहरामः ।

सम्पादकः

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**Admission Open**
**Learn Online**

Value Education Through Sanskrit in

## बालसंस्कृतवर्गः

(Class SKg to 8)

**Date :** 12/6/21 to 26/3/22
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 5000/-

**Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006